प्राग्दीव्यतोऽण् (४.१.८३/१०७३) [1]प्राप्तः [2]कालठञा (४.३.११/१३८१) बाधितः सन्धिवेलाद्यृतु-नक्षत्रेभ्यः (४.३.१६/१३८७) इति [3]पुनर्विधीयते स वा डिद् भवति इति वक्तव्यम् (म. भा. २.२७३)। शतभिषजि जातः। शातभिषजः, [4]शातभिषः।

[४०४] तीयादीकक् स्वार्थे[5] वा वक्तव्यः। (म. भा. २.२७३)

द्वैतीयीकम्। [6]तार्तीयीकम्। [7]द्वितीयकम्। तृतीयकम्।

[४०५] न विद्यायाः। (म. भा. २.२७३)

द्वितीया, तृतीया विद्या।

[४०६] गोत्रादङ्कवदिष्यते। (म. भा. २.२७३)

दृष्टं साम इत्येतस्मिन्नर्थे। औपगवेन दृष्टं साम औपगवकम्। [8]कापटवकम्। गोत्रचरणाद् वुञ् (४.३.१२६/१५०६) भवति।

दृष्टे सामनि जाते च द्विरण् डिद्वा विधीयते।
तीयादीकक् न विद्याया गोत्रादङ्कवदिष्यते (म. भा. २.२७३)॥

## वामदेवाड् ड्यड्ड्यौ। (९/१२१०)

वामदेवशब्दात् तृतीयासमर्थात् दृष्टं साम इत्येतस्मिन्नर्थे ड्यत् ड्य इत्येतौ प्रत्ययौ भवतः। अणोऽपवादः। वामदेवेन दृष्टं साम वामदेव्यं साम। [9]तित्करणं स्वरार्थम्। डित्करणं किमर्थम्? 'ययतोश्चातदर्थे' (६.२.१५६/३८९०) इति नञ [10]उत्तरस्यान्तोदात्तत्वे विधीयमानेऽनयोर्ग्रहणं मा भूत्। अननुबन्धक[11]ग्रहण[12]परिभाषया एकानुबन्धकग्रहणपरिभाषया चानयोर्निवृत्तिः [13]क्रियते (म. भा. २.२७४)। अवामदेव्यम्[14]।

सिद्धे यस्येति लोपेन किमर्थं ययतौ डितौ।
ग्रहणं माऽतदर्थे भूद्वामदेव्यस्य नञ्स्वरे (म. भा. २.२७४)॥

## परिवृतो रथः। (१०/१२११)

तेन इति तृतीयासमर्थात् परिवृतः इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति, योऽसौ परिवृतः रथश्चेत् स भवति। वस्त्रेण परिवृतो रथः वास्त्रो[15] रथः। काम्बलः। चार्मणः। रथः इति किम्? वस्त्रेण परिवृतः कायः। समन्तात् वेष्टितः परिवृत [16]उच्यते। यस्य कश्चिदवयवो वस्त्रादिभिरवेष्टितः, तत्र न भवति। तेनेह न, छात्रैः परिवृतो रथः[17] (म. भा. २.२७४)॥

---

1. प्राप्तः – वक्तव्यम् नास्ति फ. ह. 2. कालात् ठञं बाधित्वा क, कालात् ठञा ब. 3. अण् इत्यधिकम् ग. 4. सातभिषजः, सातभिषः ब. क. 5. वा नास्ति क. फ. 6. तार्तीयीकम् नास्ति फ. 7. द्वितीयम्, तृतीयम् ब. क. ड. 8. कापटकम् ब. 9. तित्करणं स्वरार्थम् नास्ति ब. 10. उत्तरस्य पदस्य क. 11. ग्रहण नास्ति फ. 12. °परिभाषायाः ब. 13. क्रियते नास्ति फ. 14. इति इत्यधिकम् क. 15. रथः नास्ति फ. 16. इति इत्यधिकम् ब. ग. क. फ. 17. इति इत्यधिकम् फ.